॥ શ્રી ॥
અથ શ્રી ત્રિવિક્રમપંડિતાચાર્યસુત શ્રી નારાયણપંડિતાચાર્યવિરચિતઃ
॥ શ્રી મધ્વવિજયઃ ॥

૧૧. એકાદશઃ સર્ગઃ
પ્રચુરાંતરપ્રવચનં ફણિરાડ ઉપશુશ્રુવાન સસનકાદિમુનિઃ ।
ગગનેઽલ્પદૃષ્ટવપુરત્ર જનૈઃ ત્વરિતં નિલીનરુચિરાપ પદમ ॥ ૧૧.૧ ॥

અતિચિત્રધામ્નિ નિજધામ્નિ રતં સસહસ્રમસ્તકમનંતમમુમ ।
મુનયોઽભિવાદ્ય વિનયાભરણાઃ વરમન્વયુંજત તદાઽર્થમિમમ ॥ ૧૧.૨ ॥

ભગવત્તમસ્ય વિપુલપ્રમતેઃ સમયં મનોહરતમં જગતિ ।
મહિતં ભવદ્ભિરપિ લોકપતે પઠતાં મુહુઃ ફલમુદેષ્યતિ કિમ ॥ ૧૧.૩ ॥

અધિકારિણાં ફલમલં વિદુષાં ભવતિ પ્રવૃત્તિરતિવીર્યવતી ।
ઈતિ તત્ફલં સફલસંકથનો ભગવાન પ્રપંચયતુ ભૂરિદયઃ ॥ ૧૧.૪ ॥

ઈતિ તૈરુદીરિતમુદારમતિઃ વચનં નિશમ્ય સ જગાદ ગિરમ ।
શૃણુતાઽદરેણ મહનીયતમં મહનીયપાદસમયસ્ય ફલમ ॥ ૧૧.૫ ॥

ત્રિદિવાદિ લભ્યમપિ નાસ્ય ફલં કથિતં કૃષેરિવ પલાલકુલમ ।
સ્વફલં તુ મુક્તિપદમુક્તિપદં શુકશારદાદિપરમાર્થવિદામ ॥ ૧૧.૬ ॥

પરમાગમાર્થવરશાસ્ત્રમિદં ભજતામમાનવકલારચિતમ ।
વ્રજતામહો પરમવૈષ્ણવતાં રતચે સ્વલોકમજિતો દિશતિ ॥ ૧૧.૭ ॥

નનુ તત્ર વિશ્વવિભવૈકપદં પ્રતિભાતિ પૂર્ણપુરુષસ્ય પુરી ।
ઉપલભ્યતે ચદુપમાનપદં પ્રતિબિંબમેવ મણિવપ્રગતમ ॥ ૧૧.૮ ॥

સિતસૌધસંતતિરુચા સ્ફુરિતા પરિતોઽરુણાશ્મગૃહપંક્તિરુચિઃ ।
ઈહ મચ્છરીરવલચે લસિતાં અનુચાતિ મૂર્તિમસુરાસુ હૃતઃ ॥ ૧૧.૯ ॥

શબળા વળીકઘટિતસ્ફટિકદ્યુતિભિર્હરિન્મણિમચી વળભી ।
પ્રતિસદ્મ ભાતિ ચમુના મિળિતા સિતસૌરસૈંધવપચોભિરિવ ॥ ૧૧.૧૦ ॥

ચદિ નાભવિષ્યદિહ વિભ્રમતાનિચમો જનસ્ય નિલચાવલિષુ ।
વિકટા વિટંકકૃતપત્રિતતિઃ કૃતકેત્યવૈક્ષ્યત કથંચન નો ॥ ૧૧.૧૧ ॥

વિવિધસ્તુલોપગતચિત્રપટીસુવિતાનલંબિમણિદામગણઃ ।
શરણાંતરેષ્વધિકપૂરણતઃ પ્રચકાસ્તિ વિભ્રમ ઈવાવગળન ॥ ૧૧.૧૨ ॥

વિમલાકૃતિઃ પ્રકૃતિરેવ મહામણિહેમમચ્ચખિલવસ્તુમચી ।
ઈહ સંભવેત સકલકાંતિરસઃ કથિતોઽધિકોક્તિભિરતઃ કવિભિઃ ॥ ૧૧.૧૩
॥

તદનાદિકાલમિતમુક્તિરતેઃઅગણચ્ચશંભુમુખસંઘતતેઃ ।

નગરૈર્મહાપુરમસંહતિમત લસતિ પ્રભોરયમહો મહિમા ॥ ૧૧.૧૪ ॥

ભવનં વિભાતિ ભુવનૈકપતેઃભુવનત્રયાદ્ભુતગુણાતિશયી ।
વરમંદિરપ્રકરમધ્યગતં દ્વિજમંડલસ્થશશિમંડલવત ॥ ૧૧.૧૫ ॥

સ્વયમિંદિરૈવ પતિમાનકરી ગૃહકર્મ યત્ર કુરુતે સુતરામ ।
અપિ કિંકરીદશશતીમહિતા શ્રિયમત્ર વર્ણયતિ વેશ્મનિ કઃ ॥ ૧૧.૧૬ ॥

કમલાપતિઃ કમલયાઽમલયા કમનીયયા કમલલોચનયા ।
અમૃતાહિરાજમૃદુભોગગતઃ સ્વરતોઽપિ તત્ર રમતે પરમઃ ॥ ૧૧.૧૭ ॥

તરુણપ્રભાકરસહસ્રરુચં કનકાંબરં મણિમયાભરણમ ।
હસિતાનનેંદુમરવિંદદૃશં તમરીંદ્રધારિણમનુસ્મરત ॥ ૧૧.૧૮ ॥

ગણયેદ રમાઽસ્ય ન ગુણાનખિલાન ચતુરાનનશ્ચતુરવાગપિ નો ।
ન વયં સહસ્રવદના અપિ તાન અપરોદિતાનતિવદેમ પુનઃ ॥ ૧૧.૧૯ ॥

વિધયો વિહંગપતયોઽગણિતા રમણીયુતાશ્ચ ફણિપેંદ્રમુખાઃ ।
પરયોગભૂરિસુખભોગમિતા અવલોક્ય તં દધતિ મોદરસમ ॥ ૧૧.૨૦ ॥

સચતુર્ભુજા વનજપત્રદૃશો વરવેષિણોઽત્ર સપિશંગપટાઃ ।
અરુણપ્રભાશ્ચ તરુણાભ્રરુચો વિચરંતિ નાથરુચયઃ પુરુષાઃ ॥ ૧૧.૨૧ ॥

ભગવત્સમીપમુપચાતવતાં પ્રમદો ન કેવલમલબ્ધતુલઃ ।
અપિ તસ્ય લોકમતિલોકગુણં ભજતાં સુદુર્લભમભૂરિશુભૈઃ ॥ ૧૧.૨૨ ॥

ન ભવંતિ યત્ર મૃતિજન્મજરાઃ ત્રિવિધં ભયં કિમુત દુઃખગણઃ ।
અપરં ચ કિંચિદશુભં ન ભવેત ન ગુણાદિ તત્પ્રભવમૂલમપિ ॥ ૧૧.૨૩ ॥

અનુભૂયતે સુખમનંતસખૈઃ સકલૈરલંમતિપદં સતતમ ।
અપિ તારતમ્યસહિતૈઃ સ્વગુરુપ્રવણૈઃ પરસ્પરમુરુપ્રણયૈઃ ॥ ૧૧.૨૪ ॥

અતિસુંદરાઃ સુરભયઃ પુરુષાઃ હરિચંદનેન નવચંદ્રરુચા ।
ચલચારુચામરધરાનુચરા વિચરંતિ નિત્યતરુણા ઈહ તે ॥ ૧૧.૨૫ ॥

સવિલાસલાસ્યપરિતુષ્ટદૃશો મૃદુગીતવાદ્યમુદિતશ્રવણાઃ ।
અનુરંજયંતિ નવકંજદૃશો રમણા અમી સ્વરમણીસ્તરુણીઃ ॥ ૧૧.૨૬ ॥

પરિણાયકાનુપવનાભિમુખાન અનુ નિસ્સરંતિ હરિણીનયનાઃ ।
વિમલાદ વિમાનવલયાચ્છનકૈઃ શશિમંડલાદિવ રુચો રુચિરાઃ ॥ ૧૧.૨૭
॥

અરુણાશ્મવર્ણતનવસ્તનવઃ શુભહારસન્નિભરુચોઽપ્યપરાઃ ।
હરિનીલનીલરુચયોઽત્રપરાઃ પ્રકટીભવંતિ વિવિધાભરણાઃ ॥ ૧૧.૨૮ ॥

સુચિરદ્યુતીર્દધતિ સૂક્ષ્મતરં સ્વચમંબરં ચ ખલુ બિભ્રતિ યાઃ ।

શુકનિઃસ્વના ધ્રુવમિમા અપરાઃ સુપયોધરા જલધરાવલયઃ ॥ ૧૧.૨૯ ॥

સમતીતવિદ્રુમભુવાં સુદૃશાં પદપલ્લવાગ્ર્યનખરક્તરુચીઃ ।
પરભાગતઃ સ્ફટિકકુટ્ટિમભૂઃ પ્રકટીકરોતિ ન પુરા પ્રકટાઃ ॥ ૧૧.૩૦ ॥

હરિણીદૃશાં નિવસનાનિ બૃહત્સુનિતંબબિંબરુચિરોરુરુચા ।
શબળદ્યુતીનિ મદનસ્ય જગજ્જયવૈજયંત્ય ઈતિ નિશ્ચિનુમઃ ॥ ૧૧.૩૧ ॥

કરપલ્લવૈસ્તરળિતૈર્લલિતૈઃ અસકૃત ક્વણત્કનકકંકણકૈઃ ।
નવરોમરાજિવલિવલ્ગુમૃદુપ્રતનૂદરૈરતિમનાક તરળૈઃ ॥ ૧૧.૩૨ ॥

કુચકુંભપૂર્ણતરકાંતિસુધારસશેષબિંદુવિસરચ્છવિભિઃ ।
વરહારરાજિભિરુતાનુપદં પરિલોઠિતાભિરશનૈરુરસિ ॥ ૧૧.૩૩ ॥

અપિ લીલયા કુવલયોલ્લસિતૈઃ અપરૈઃ કરૈઃ સહચરીનિહિતૈઃ ।
વદનૈઃ શુચિસ્મિતકટાક્ષરસૈઃ ચલકુંડલોલ્લસિતગંડયુગૈઃ ॥ ૧૧.૩૪ ॥

પ્રગતાસુ તાસુ રણિતૈ રશનામણિનૂપુરૈરિવ પુરા ગદિતાઃ ।
અનુવીક્ષિતું તનુવિલાસમિમં તરુણા ભવંત્યથ નિવૃત્તમુખાઃ ॥ ૧૧.૩૫ ॥

અનુપાલિતાઃ સ્વદયિતૈર્દયિતાઃ કથમપ્યુપેત્ય કુચભારનતાઃ ।
શનકૈઃ પુનસ્તદવલંબબલાત કિલ તા વિશંતિ પરમોપવનમ ॥ ૧૧.૩૬ ॥

હસિતપ્રસૂનનિકરોરુભરપ્રણમત્સુવર્ણમણિસર્વતરૂન ।
ઉપગૂહયન્નમૃતસિંધુસખઃ પવનો ન કસ્ય સુખમેધયતિ ॥ ૧૧.૩૭ ॥

વરપારિભદ્રકસુકલ્પતરુવ્રજપારિજાતહરિચંદનવત ।
સહિતં સમાદિપદતાનનગૈઃ પરિભૂષયંતિ તદહો ઋતવઃ ॥ ૧૧.૩૮ ॥

સ્મિતમાધવીકુસુમરમ્યતરૌ નવચંપકાદિકુસુમોલ્લસિતૌ ।
મધુમાધવૌ મધુપગીર્મધુરૌ મધુજિત્પ્રિયાન પ્રમદમાનયતઃ ॥ ૧૧.૩૯ ॥

નવમલ્લિકાસ્રજમભીષ્ટતમઃ શુચિસંભવાં પ્રણયિનીશિરસિ ।
કલયન સ્વયં ન કુશલેતિ કિલ પ્રતિઘટ્ટયત્યુરુકુચાવુરસા ॥ ૧૧.૪૦ ॥

મધુરસ્વરાસ્તતપતત્રતતિપ્રકટાંતપંક્તિધૃતનેત્રરુચઃ ।
શિખિનોઽનુયાંતિ હિ સહસ્રદૃશં જલદર્તુ લક્ષ્મનિજનૃત્તમહે ॥ ૧૧.૪૧ ॥

શરદોલ્લસત્કુવલયેક્ષણયા વિકચારવિંદરુચિરાનનયા ।
પ્રિયયા ચ શોભનશુકસ્વનયા રમતે જનો મુખર હંસકયા ॥ ૧૧.૪૨ ॥

અભિનંદયન હિમઋતું સુસખા સ્ફટિકાચલચ્છલહિમાધિકૃતમ ।
ફલિનીકુલં કુસુમયન શિશિરો હસતીવ ફુલ્લનવકુંદરુચા ॥ ૧૧.૪૩ ॥

હિમશીતવર્ષપરિતાપપુરસ્સરદોષમૂલમિહ નર્તુગુણઃ ।
પ્રિયમેવ સાધયતિ નિત્યમહો સ વિમુક્તિમાનિતિ વિમુક્તિમતામ ॥

૧૧.૪૪ ॥

અમૃતસ્રગુત્તમફલપ્રસવાન અમૃતાય તત્ર જનતાઽર્પયતિ ।
ઉપભોક્તુમપ્યવિધિબંધવશા પ્રકૃતિં પ્રયાતિ સકલોઽપિ સદા ॥ ૧૧.૪૫ ॥

પ્રમદાતિરેકમુપયાતવતા પ્રમદાગણેન ચરતોપવને ।
ઉપગીયતે સ્મ મધુરં મધુજિચ્ચરિતં સકાંતતતિના સતતમ ॥ ૧૧.૪૬ ॥

લલના લલંત્યભિવરં પ્રવરા લળિતા લુનંતિ કુસુમાનિ પરાઃ ।
ઈતરાઃ સ્રજો વિરચયંતિ પતીન અનુરંજયંતિ ન હિ કાશ્ચન નો ॥ ૧૧.૪૭
॥

વનલીલયા વિવિધયા મુદિતાઃ તરુણા ઘનસ્તનનતાસ્તરુણીઃ ।
સુલતાલયેષુ પરિરભ્ય રતિં વદનારવિંદમધુપા દધતિ ॥ ૧૧.૪૮ ॥

રસિકાઃ સુધાપ્સુ સરસીષુ તતો રુતનૂપુરાનુકૃતસારસિકાઃ ।
વિહરંતિ સાકમવગાહ્ય ધવૈઃ જલમડ્ડુકોત્સવહસદ્વદનાઃ ॥ ૧૧.૪૯ ॥

વિવિધા વિધાય વિહૃતીઃ સલિલે વિકટેષુ વિદ્રુમતટેષુ ગતાઃ ।
સુરભિં સુવર્ણમથ વર્ણકમાદદતે સખીકરગતં મહિળાઃ ॥ ૧૧.૫૦ ॥

જઘનાંશુકૈરવયવાભરણૈઃ કુચકુંકુમૈશ્ચ કચમાલ્યવરૈઃ ।
નયનાંજનૈરપિ મિથોબ્જદૃશાં ઘટિતૈરલંકૃતિરલં ક્રિયતે ॥ ૧૧.૫૧ ॥

તનુમધ્યમા નિજગૃહાણિ ગતાઃ સમમાત્મનામસુસમૈરસમૈઃ ।
અમૃતં પિબંત્યસુલભં ભવિભિઃ ચષકૈર્મહારજતરત્નમયૈઃ ॥ ૧૧.૫૨ ॥

મૃદુકમ્રશય્યમનુરાગવતાં મણિમંચમંચિતદૃશોઽવસરે ।
અપિ ચોદિતા અધિરુહંતિ શનૈઃ વિનયો હિ ભૂષયતિ સર્વરસમ ॥
૧૧.૫૩ ॥

અભિકાંતમુન્નમિતકાંતકુચા કિલ બધ્નતી સકુસુમાં કબરીમ ।
સુમુખી સુલક્ષ્યભુજમૂલવલિઃ પરિરભ્યતે પ્રણયિનાઽતિરસાત ॥ ૧૧.૫૪
॥

પૃથુવૃત્તતુંગકઠિનોરસિજદ્વયવારિતાયતનિજાંતરયોઃ ।
ભુજયોર્યુગેન રમણો રમણીં પરિરભ્ય કોઽત્ર રમયેન્ન સુખી ॥ ૧૧.૫૫ ॥

સ્મિતફુલ્લમુલ્લસિતઝિલ્લિલસન્મણિકુંડલં મૃદુકટાક્ષપટુ ।
નિભૃતો નિરીક્ષ્ય સુચિરં સુતનોઃ પ્રતિચુંબતિ પ્રિયતમો વદનમ ॥ ૧૧.૫૬
॥

નતમુન્નમય્ય મુખચંદ્રમસં પરિરંભસંભૃતમુદા સુદૃશઃ ।
ઉપરમ્યતે ન તરુણેન ચિરં મધુરાધરામૃતરસં પિબતા ॥ ૧૧.૫૭ ॥

રભસાવપાતિતપૃથૂરસિજઃ પરિરભ્ય તત્ક્ષણવિયાતતરઃ ।

મણિતાદિસૌરતવિતાનપટૂ રમયત્યમૂન યુવતિસંઘ ઉત ॥ ૧૧.૫૮ ॥

અતિલૌકિકાન રમયતો રમણાન રમયંત્યલૌકિકગુણા લલનાઃ ।
અનુરૂપરૂપમતિલોકસુખં તદલૌકિકં નિધુવનં લસતિ ॥ ૧૧.૫૯ ॥

ન રતિઃ શ્રમાદિખચિતા નિયમાદ વિરહવ્યથાઽપિ ન વધૂવરયોઃ ।
પ્રતિકામિનીપ્રણયતઃ કલહો ન સમસ્તિ દોષરહિતે હિ પદે ॥ ૧૧.૬૦ ॥

સુખસંવિદાત્મકતયા વપુષાં સુરભિત્વમેવ બહિરંતરપિ ।
હરિધામ્નિ દંપતિગણસ્ય તતો નનુ માન્યતેઽપિ મુનિભિઃ સુરતમ ॥ ૧૧.૬૧
॥

શૃણુતાપ્યલોકવિષયં વિષયં સકલસ્ય મુક્તનિકરસ્ય દૃશામ ।
વપુરિંદિરાપતિરમંદરસં નનુ સુંદરં પ્રકટયત્યનિશમ ॥ ૧૧.૬૨ ॥

મણિરાજિરાજિત મહામકુટં શિતિકાંતકુંતળસહસ્રતયમ ।
અળિકાર્ધચંદ્રવિલસત્તિલકં શ્રવણોલ્લસન્મકરકુંડલયુક ॥ ૧૧.૬૩ ॥

પરિપૂર્ણચંદ્રપરિહાસિમુખં જલજાયતાક્ષમરુણોષ્ઠપુટમ ।
હસિતાવલોકલલિતૈરતુલૈઃ અભિનંદયત પ્રણતમાત્મજનમ ॥ ૧૧.૬૪ ॥

નવકંબુકંઠમહિમાંશુમહો મહિમોપલેંદ્રવરહારધરમ ।
રમણીયરત્નગણવિદ્ધલસદ્વલયાંગુલીયકવરાંગદવત ॥ ૧૧.૬૫ ॥

રવિચક્રરુકપ્રકરચક્રકરં વિધુબિંબકંબુ મધુરાંબુરુહમ ।
જ્વલનજ્વલદ્દ્રદમુદારધનુઃ પૃથુવૃત્તહસ્તમતિતામ્રતળમ ॥ ૧૧.૬૬ ॥

વરપીવરાંસમધિરાજદુરોમણિમંટપાગ્ર્યવિલસત્કમલમ ।
સજગદ્વિસપ્તકતનૂદરકં શુભનાભિકંજગતકાળિનુતમ ॥ ૧૧.૬૭ ॥

અતિકાંતકાંચિપદકાંચિમિલત્તપનીચભંગરુચિપિંગપટમ ।
વરહસ્તિહસ્તસદૃશોરુયુગં ક્રમવૃત્તચારુતરજંઘમુત ॥ ૧૧.૬૮ ॥

વરનૂપુરં પરમરુકપ્રપદં નવવિદ્રુમદ્યુતિનખાવલિમત ।
અરિવારિજધ્વજકળંકલસત્પદપાંસુપાવિતજગત્ત્રિતયમ ॥ ૧૧.૬૯ ॥

નિખિલાગમાવગમિતૈરમિતૈઃ સુખસંવિદાદિભિરનંતગુણૈઃ ।
પ્રપદાદિકાંતસકલાવચવાકૃતિભિઃ સદૈક્યવદદોષલવમ ॥ ૧૧.૭૦ ॥

અધિકારિણાં ગુણવિશેષવષાદ દ્વિપદાદ્યનંતચરણાંતતયા ।
અતિભાસિતં ઘનગુણાપઘનૈઃ ઈતરૈષ્ચ તત્તદુચિતૈ રુચિતૈઃ ॥ ૧૧.૭૧ ॥

નવભાનુભાઃ કનકકાંતિપરં વરહારહારિ હરિનીલહરિત ।
શબળપ્રભાદિવિવિધદ્યુતિમત સુખબોધસૌરભસુરૂપગુણમ ॥ ૧૧.૭૪ ॥

આષ્ચર્ચરત્નેશ વધિકં જગત્ત્રચેપ્યાષ્ચર્યમાષ્ચર્યમહો મુહુર્મુહુઃ ।

સૌંદર્યસારૈકરસં રમાપતેઃ રૂપં તદાનંદયતીહ મોક્ષિણઃ ॥ ૧૧.૭૩ ॥

ઈજ્યતે યજ્ઞશીલૈઃ સ યજ્ઞઃ પ્રાજ્ઞમધ્યે પરઃ પ્રોચ્યતેઽન્યૈઃ ।
ગીયતે ગેયકીર્તિઃ સુગીતૈઃ વિધ્યબદ્ધૈઃ સદાઽઽનંદસાંદ્રૈઃ ॥ ૧૧.૭૪ ॥

વૈકુંઠે તે શ્રીવિશેષા જનાનામત્યાશ્ચર્યં ચિત્તવાચામભૂમિઃ ।
વૈકુંઠેતે શ્રીવિશેષાજનાનામુકતશ્લાઘ્યે યુકતમેતાદૃશત્વમ ॥ ૧૧.૭૫ ॥

યંયં સુખી કામયતેઽર્થમત્ર સંકલ્પમાત્રાત સકલોઽપિ સ સ્યાત ।
ઈત્યેવ વેદા અપિ વેદયંતિ મુક્તિં તતઃ કો વિભવાતિરેકઃ ॥ ૧૧.૭૬ ॥

મહાનંદતીર્થસ્ય યે ભાષ્યભાવં મનોવાગ્ભિરાવર્તયંતે સ્વશકત્યા ।
સુરાદ્યા નરાંતા મુકુંદપ્રસાદાદ ઈમં મોક્ષમેતે ભજંતે સદેતિ ॥ ૧૧.૭૭ ॥

॥ ઈતિ શ્રીમત્કવિકુલતિલક ત્રિવિક્રમપંડિતાચાર્યસુત
શ્રીનારાયણપંડિતાચાર્યવિરચિતે શ્રીમધ્વવિજયે
આનંદાંકિતે એકાદશઃ સર્ગઃ ॥